श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीभगवद्ध्यानसोपानम् ॥

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीभगवद्ध्यानसोपानम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

अन्तर्ज्योतिः किमपि यमिनामञ्जनं योगदृष्टेः
चिन्तारत्नं सुलभमिह नः सिद्धि मोक्षानुरूपम्।
दीनानाथ व्यसन शमनं दैवतं दैवतानां
दिव्यं चक्षुः श्रुति परिषदां दृश्यते रङ्ग मध्ये॥ १ ॥

वेलातीत श्रुति परिमळं वेधसां मौलि सेव्यं
प्रादुर्भूतं कनक सरितः सैकते हंस जुष्टे।
लक्ष्मी भूम्योः कर सरसिजैर्लालितं रङ्गभर्तुः
पादाम्भोजं प्रतिफलति मे भावना दीर्घिकायाम्॥ २ ॥

चित्राकारां कटक रुचिभिश्चारु वृत्तानुपूर्वां
काले दृत्य द्रुततर गतिं कान्ति लीला कलाचीम्।
जानुच्छाया द्विगुण सुभगां रङ्गभर्तुर्मदात्मा
जङ्घां दृष्ट्वा जनन पदवी जाङ्घिकत्वं जहाति॥ ३ ॥

कामाराम स्थिर कदलिका स्तम्भ संभावनीयं
क्षौमाश्लिष्टं किमपि कमला भूमि नीळोपधानम्।
न्यञ्चत्काञ्ची किरण रुचिरं निर्विशत्यूरु युग्मं
लावण्यौघ द्वयमिव मतिर्मामिका रङ्ग यूनः॥ ४ ॥

संप्रीणाति प्रतिकलमसौ मानसं मे सुजाता
गम्भिरत्वात् क्वचन समये गूढ निक्षिप्त विश्वा।
नालीकेन स्फुरित रजसा वेधसो निर्मिमाणा
रम्यावर्त द्युति सहचरी रङ्गनाथस्य नाभिः॥ ५ ॥

श्रीवत्सेन प्रथित विभवं श्री पद न्यास धन्यं
    मध्यं बाह्वोर्मणिवर रुचा रञ्जितं रङ्गधाम्नः।
सान्द्रच्छायं तरुण तुलसी चित्रया वैजयन्त्या
    सन्तापं मे शमयति धियश्चन्द्रिकोदार हारम्॥ ६ ॥

एकं लीलोपहितमितरं बाहुमाजानु लम्बं
    प्राप्ता रङ्गे शयितुरखिल प्रार्थना पारिजातम्।
दृप्ता सेयं दृढ नियमिता रश्मिभिर्भूषणानां
    चिन्ता हस्तिन्यनुभवति मे चित्रमालान यन्त्रम्॥ ७ ॥

साभिप्राय स्मित विकसितं चारु बिम्बाधरोष्ठं
    दुःखापाय प्रणयिनि जने दूर दत्ताभिमुख्यम्।
कान्तं वक्त्रं कनक तिलकालङ्कृतं रङ्ग भर्तुः
    स्वान्ते गाढं मम विलगति स्वागतोदार नेत्रम्॥ ८ ॥

माल्यैरन्तः स्थिर परिमळैर्वल्लभा स्पर्श मान्यैः
    कुप्यच्चोळी वचन कुटिलैः कुन्तलैः श्लिष्ट मूले।
रत्नापीड द्युति शबळिते रङ्गभर्तुः किरीटे
    राजन्वत्यः स्थितिमधिगता वृत्तयश्चेतसो मे॥ ९ ॥

पादाम्भोजं स्पृशति भजते रङ्गनाथस्य जङ्घाम्
    ऊरुद्वन्द्वे विलगति शनैरूर्ध्वमभ्येति नाभिम्।
वक्षस्यास्ते वलति भुजयोर्मामिकेयं मनीषा
    वक्त्राभिख्यां पिबति वहते वासनां मौळि बन्धे॥ १० ॥

कान्तोदारैरयमिह भुजैः कङ्कण ज्या किणाङ्कैः
    लक्ष्मी धाम्नः पृथुळ परिघैर्लक्षिताभीति हेतिः।
अग्रे किंचिद्भुजग शयनः स्वात्मनैवात्मनः सन्
    मध्ये रङ्गं मम च हृदये वर्तते सावरोधः॥ ११ ॥

रङ्गास्थाने रसिक महिते रञ्जिताशेष चित्ते
    विद्वत्सेवा विमल मनसा वेङ्कटेशेन क्लृप्तम्।

अक्लेशेन प्रणिहित धियामारुरुक्षोरवस्थां
भक्तिं गाढां दिशतु भगवद्ध्यान सोपानमेतत्॥ १२॥

॥ इति श्रीभगवद्ध्यानसोपानं समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥